# Paramarchanatrimshika by Nagarjuna

# નાગાર્જુનકૃતા પરમાર્ચનત્રિંશિકા

## Document Information

Text title : paramArchanatriMshikA

File name : paramArchanatriMshikA.itx

Category : shiva, triMshikA

Location : doc_shiva

Author : Nagarjuna

Transliterated by : Girdhari Lal Koul glkoul.18 at gmail.com

Proofread by : Girdhari Lal Koul, Ruma Dewan

Latest update : July 10, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# નાગાર્જુનકૃતા પરમાર્ચનત્રિંશિકા

અથ પરમાર્ચનત્રિંશિકા નાગાર્જુનકૃતા ।

સ્નાનપૂજનસમાધિભિઃ ક્રમા-
ધન્મહાત્મભિરવાપ્યતે પદમ્ ।
કૈશ્ચિદક્રમત એવ યન્મયા
તત્સમર્ચનમિષેણ કથ્યતે ॥ ૧॥

બાલિકારચિતવસ્ત્રપુત્રિકા-
ક્રીડનેન સદૃશં તદર્ચનમ્ ।
યત્ર શામ્યતિ મનો ન નિર્મલં (ન પૂજને)
સ્ફીતચિજ્જલધિ મધ્યમાશ્રિતમ્ ॥ ૨॥

કિં તદર્ચનમનલ્પ કલ્પના-
જાલશમ્બરનિપાતિતાત્મકમ્ । (નિપાતિતાત્મનામ્)
યત્ર નાસ્તિ સવિકલ્પનોજ્ઝિતઃ (સ્વવિકલ્પનોજ્ઞ્ઝિતઃ)
સ્ફીતસૌખ્યશિવસઙ્ગમોત્સવઃ ॥ ૩॥ (સ્ફીતમૌખ્ય)

અપ્રયત્નમનિકેતનં પદં
દિવ્યમાપ્ય મનસૈવ વૃત્તયઃ । (દિવ્યમાપ્યતરસૈવવૃત્તયઃ)
યત્ર યાન્તિ વિલયં ન સર્વતઃ
કિં તદર્ચનમસૌ પરાભવઃ ॥ ૪॥

યત્ર વર્ષતિ ન ખેચરી સ્થિતિ- (ના)
શ્ચિત્સુધારસ ભરૌઘનિર્ઝરમ્ ।
દેહચિત્તપરિપીડનાવહં (દહં)
કિં તદર્ચનમસૌ પરાભવઃ ॥ ૫॥

ખેચરીપ્રભૃતિપઞ્ચકાત્મના
વ્યાપ્તિમમ્બરગતાં નિભાલયન્ ।
હૃદ્વિકાસસુભગં ભવાપદો (હૃદ્વિકાસસુલભાં)

યત્ર મુઞ્ચતિ ન કિં તદર્ચનમ્ ॥ ૬॥

યત્ર સાહસસમાધિસંશ્રયઃ
પ્રસ્ફુરદ્વિમલબોધનિર્ભરઃ ।
સ્ફીતસંવિદુદયં ન વિન્દતે
સર્વવૃત્તિષુ કિમેતદર્ચનમ્ ॥ ૭॥

વિશ્વસંહૃતિરસૈકતત્પરો-
લેલિહાનરસનાકુલોયમઃ ।
યત્ર ચિચ્છિખિશિખા સુહૂયતે
લીલયૈવ ન કિમેતદર્ચનમ્ ॥ ૮॥

સ્તબ્ધમન્થરમનોહરેક્ષણઃ
પ્રોલ્લસત્પુલકચુમ્બિતાનનઃ । (પ્રોલ્લસત્પુલકલમ્બિતાનનઃ)
મધ્યમાં ભુવમનલ્પ સમ્પદં
યત્ર નાશ્રયતિ કિં તદર્ચનમ્ ॥ ૯॥

માનમેયમિતિ કલ્પનોજ્ઝિતો
નિર્વિકારમનિકેતનઃ શિવઃ ।
ગાઢગાઢમવગાહ્યતે ક્ષણા-
ન્નૈવ યત્ર નનુ કિં તદર્ચનમ્ ॥ ૧૦॥

વ્યોમકલ્પમમિતં નિજં વપુ-
ર્વીક્ષ્ય ચિત્પર સુધાર સઞ્ચિતમ્ ।
સ્વાત્મનાત્મનિ નિરસ્તકલ્પનો
યત્ર હૃષ્યતિ ન કિં તદર્ચનમ્ ॥ ૧૧॥ (યત્ર સુહૃતિ)

નિર્નિકેતનિરુપાધિ નિર્મલં
સ્ફારચિદ્રવિમરીચિસઞ્ચયૈઃ ।
વિશ્વમારચિતમીક્ષ્ય વિસ્મયં (વિશ્વમારચિતંવીક્ષ્ય)
યત્ર નાશ્રયતિ કિં તદર્ચનમ્ ॥ ૧૨॥

યત્ર નિત્યપરહર્ષનિર્ભર-
શ્ચિત્સુધાર સનિપાત ઘૂર્ણિતઃ । (સનિપાન)
ધ્યાનયોગ કલનાસુ લજ્જતે
નીરસાસુ ન કિમેતદર્ચનમ્ ॥ ૧૩॥

શક્તિવિસ્તર વિમર્શ વિસ્ફુરત્- (વિમર્શા)
  કન્દ યુગ્મયુગ પદ્વિગાહનાત્ ।
ભૈરવં વપુરુદારચેષ્ટિતં
  યત્ર ન સ્ફુરતિ કિં તદર્ચનમ્ ॥ ૧૪॥

ઇન્દ્રિયેષુ વિષયાનુવર્તિષુ
  પ્રાણવર્ત્મનિ નિજપ્રવાહકે ।
કાપિ નિર્વૃતિમયી ચિદૂર્જિતા
  યત્ર નોલ્લસતિ કિં તદર્ચનમ્ ॥ ૧૫॥

દિવ્ય ખેચરદૃશા નિરીહયા
  નાદબિન્દુ મયભાવ સઞ્ચયમ્ ।
યત્ર શુષ્કમિવ પાવકસ્તૃણં (?પાવંકસ્તૃણં)
  ન ક્ષયં નયતિ કિં તદર્ચનમ્ ॥ ૧૬॥

શાન્તિમેતિ ન વિકલ્પવિપ્લવ-
  શ્ચિચ્ચમત્કૃતિરસો ન વર્ધતે ।
લુપ્યતે ન ઘનવાસનાવનં
  કાપિ તૃપ્તિરસમા ન જાયતે ॥ ૧૭॥

મન્યતે ન કૃતકૃત્યતાં મનો
  દ્વૈતમેઘતિમિરં ન ભિદ્યતે ।
યત્ર દોષશત સઙ્કુલં મનો
  ન પ્રસીદતિ કિમેતદર્ચનમ્ ॥ ૧૮॥

ચિન્નભસ્સરસિ સારસીં પરાં
  શક્તિમચ્છવિભવાં પ્રબોધયન્ ।
મન્ત્રવીર્યમમિતં નિસર્ગતો (?વિસર્ગતો)
  યત્ર નાશ્રયતિ કિં તદર્ચનમ્ ॥ ૧૯॥

નિર્વિકારમજરં નિરામયં (નિર્વિકારજડં નિરામલં)
  નિર્વિકલ્પમમિતં નિજં વપુઃ । (નિર્વિકલ્પમમજરં)
વીક્ષ્ય જન્મમરણોદિતં ભયં (જન્મમરણોધિતં)
  યત્ર મુઞ્ચતિ ન કિં તદર્ચનમ્ ॥ ૨૦॥

શાન્તવીચિચયસિન્ધુસન્નિભાં

સર્વસંવિદુદયાવનિં પરામ્ ।
સૃષ્ટિસંસ્થિતિલય પ્રશક્તિભિ-
વિશ્વ સુન્દર વિવર્તવર્તિનીમ્ ॥ ૨૧॥

શક્તિચક્ર પરમાધિદેવતા-
મમ્બરપ્રથમ ભૂમિકામજામ્ ।
મઙ્ગલામ સમમન્ત્રમાતરં (સમન્ત્રમાતરં)
યત્ર પશ્યતિ ન કિં તદર્ચનમ્ ॥ ૨૨॥

સોમસૂર્યદહનેન્ધનોદ્યત (દહન્નોદ્ધત)
સ્ફીતચિજ્જ્વલન દીપ્તિભાસ્વરઃ ।
દુર્નિરીક્ષ્યગતિરક્રમઃ શિવો (ગતિરિદ્ધતતેજસા)
ભાતિ યત્ર ન કિમેતદર્ચનમ્ ॥ ૨૩॥

આત્મનાત્મનિ ન જાનતે વિધિં
નિસ્તરઙ્ગપરબોધભાસ્વરઃ ।
યત્પદસ્થિતિજુષો મહાજનઃ (મહજના)
મુક્તિ સંસૃતિ સમાન બુદ્ધયઃ ॥ ૨૪॥

યદ્યદા પતતિ વેદ્યતા ભુવં
તેન તેન નનુ યદ્વિવર્જિતમ્ ।
નિત્ય નિર્મલ સમાધિભૂમયો
યત્પદે વિમતિ બાલકલ્પનાઃ ॥ ૨૫॥ (બાલકલ્પના)

યદ્વિશૃઙ્ખલમહોદયોલ્લસત્
શક્તિપાતવશતો વિજૃમ્ભતે ।
તત્પદં યદિ ગુરુપ્રસાદતો (તત્પદં ગુરુપ્રસાદતો મયા)
લબ્ધમુત્તમ મથાર્ચિતઃ શિવઃ ॥ ૨૬॥

ભાવસઞ્ચય વિમુક્તવિગ્રહા
વિશ્વમપ્યપિ પરપ્રથાત્મિકા ।
કાપિ સંવિદમલામ્બરપ્રભા
જૃમ્ભતે યદિ તદાર્ચિતઃ શિવઃ ॥ ૨૭॥

કિઞ્ચનાપિ ન વિમુચ્યતે ક્વચિત્-
કિઞ્ચનાપિ ન ચ ગૃહ્યતે ક્વચિત્ । (કિઞ્ચિનાપિ)
સ્વં વપુર્વિમલ બોધ નિર્ભરં (બોધ નિર્મલં)

દૃશ્યતે યદિ તદાર્ચિતઃ શિવઃ ॥ ૨૮॥

ભૈરવા વિવિધ કલ્પનાત્મકાઃ
પ્રોલ્લસન્તિ બહવો તતોમ્બિકાઃ । (યતોઅમ્બિકા)
સા યતઃ સ્ફુરતિ તત્પરં પદં
ભાતિ ચેદ્ગુરુદૃશા શિવોર્ચિતઃ ॥ ૨૯॥

આસાદિતં ગુરુમુખાદિદમપ્રયત્ન (પ્રયત્નં)
સિદ્ધં શિવાર્ચનમપાપ્મધિયામવાપ્યમ્ ।
યત્તન્મયા નિગદિતં તદનલ્પવાઞ્છા
સમ્બોધનાય સુધિયાં શિવભક્તિભાજામ્ ॥ ૩૦॥

અનવચ્છિન્ન ચિદ્વ્યોમ પરમામૃતબૃંહિતઃ ।
નાગભિધોવ્યધાદેતાં પરમાર્ચનત્રિંશિકામ્ ॥

ઇતિ શ્રીમહામાહેશ્વરનાગવિપશ્ચિદ્વિરચિતા પરમાર્ચનત્રિંશિકા સમાપ્તા ।

In some prints, the 21st shloka is found at no. 29,
and the verse numbers are shifted then.

Encoded by Girdhari Lal Koul
Proofread by Girdhari Lal Koul, Ruma Dewan

---

*Paramarchanatrimshika by Nagarjuna*
pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*